क्षेपकादयः । आयुष्मन्तो मन्दजरा वपुर्वर्णबलान्विताः ॥ स्थिरोपचितमांसाश्च भवन्ति स्त्रीषु संयताः । त्रिभिस्त्रिभिरहोभिर्हि समीयात् प्रमदां नरः ॥ सर्वेष्वृतुषु धर्म्मेषु पश्चात्तपश्चाद् व्रजेत् बुधः । रजस्वलामकामाञ्च मलिनामप्रियां तथा ॥ वर्णवृद्धां वयोवृद्धां तथा व्याधिप्रपीड़िताम् । हीनाङ्गीं गर्भिणीं द्वेष्यां योनिदोषसमन्विताम् ॥ सगोत्रां गुरुपत्नीञ्च तथा प्रव्रजितामपि । सन्ध्यापर्वस्वगम्याश्च नोपेयात् प्रमदां नरः ॥ गोसर्गे चार्द्धराते च तथामध्यन्दिनेषु च । लज्जासमावहे देशे विवृतेऽशुद्ध एव च ॥ क्षुधितो व्यावितश्चैव क्षुब्धचित्तश्च मानवः । वातविण्मूत्रवेगो च पिपासुरतिदुर्बलः ॥ तिर्य्यग्योनावयोनौ च प्राप्तशुक्रविधारणम् । दुष्टयोनौ विसर्गन्तु बलवानपि वर्जयेत् ॥ रेतसश्चातिमात्रन्तु मूत्रविरणमेव च । स्थितावुत्तानशयने विशेषेणैव गर्हितम् ॥ क्रीड़ायामपि मेधावी हितार्थी परिवर्जयेत् । रजस्वलां प्राप्नुवतो नरस्यानियतात्मनः ॥ दृष्ट्यायुस्तेजसां हानिरधर्म्मश्च ततो भवेत् । लिङ्गिनीं गुरुपत्नीञ्च सगोत्रामथ पर्वसु ॥ वृद्धाञ्च सन्ध्ययोश्चापि गच्छतो जीवितक्षयः । गर्भिण्यां गर्भपीड़ा स्याद्व्याधितायां बलक्षयः ॥ हीनाङ्गीं मलिनां द्वेष्यां क्षामं बन्ध्यामसंवृते । देशेऽशुद्धे च शुक्रस्य मनसश्च क्षयो भवेत् ॥ क्षुधितः क्षुब्धचित्तश्च मध्याह्ने तृषितोऽबलः । स्थितस्य हानिं शुक्रस्य वायोः कोपञ्च विन्दति ॥ अतिप्रसङ्गाद्भवति शोषः शुक्रक्षयावहः । व्याधितस्य रुजा पीड़ा मृत्युर्मूर्च्छा च जायते । प्रत्यूषस्यर्द्धराते च वातपित्ते प्रकुप्यतः ॥ तिर्य्यग्योनावयोनौ च दुष्टयोनौ तथैव च । उपदंशस्तथा वायोः कोपः शुक्रस्य च क्षयः ॥ उच्चारिते मूत्रिते च रेतसश्च विधारणे । उत्ताने च भवेच्छीघ्रं शुक्राश्मर्य्यास्तु सम्भवः ॥ सर्वं परिहरेत्तस्मादेतल्लोकद्वये हितम् । शुक्रं चोपस्थितं मोहान्न सन्धार्यं कथञ्चन ॥ वयोरूपगुणोपेतां तुल्यशीलां गुणान्विताम् । अभिकामोऽभिकामान्तु हृष्टो हृष्टामलंकृताम् ॥ सेवेत प्रमदां युक्त्या वाजीकरणवृंहितः । भक्ष्याः सशर्कराः क्षीरं ससितं, रस एव च ॥ स्नानं सव्यजनं स्वप्नो व्यवायान्ते हितानि तु इति" । एतेषामन्यथाचरणे यथायथं दुःखान्युत्पद्यन्ते ।

**अनागतार्त्तवा** स्त्री स्त्रीपुष्पविकाशनम् आर्त्तवम् न आगतमार्त्तवं यस्याः । स्त्रीधर्मशून्यायां नग्निकायां कन्यायाम् ।

**अनागन्धित** त्रि० न आगन्धितः आघ्रातः । अनाघ्राते, "सर्वदोषानागन्धितं प्रतिवचनमाहेति" छ०उ०भा० ।

**अनागम** पु० नास्ति आगमः स्वत्वहेतुः क्रयादिर्यत्र । स्वत्वहेतुक्रयादिशून्ये "अनागमं तु यो भुङ्क्ते बहून्यब्दशतान्यपीति" स्मृतिः अधिकमागमशब्दे वक्ष्यते ।

**अनागस्** त्रि० नास्ति आगोऽपराधः पापं वा यस्य । अपराधशून्ये पापशून्ये च "आर्त्तत्राणाय वः शस्त्रं न प्रहर्त्तुमनागसीति" शकु० । "अनागसे शंसति बालचापलमिति" नैष० । "अनागसः तमदितिः कृणोतु ऋ० ४,३९,३, "अनागसं पापरहितमिति" भा० । "तवानागसो अदितये स्याम" ऋ० १,२४,२५, "अनागसः अपराधरहिताः स्यामेति" भा० ।

**अनाचार** पु० अप्राशस्त्ये ऽभावे वा न०त० । कदाचारे, आचाराभावे च । "सर्वदेशेष्वनाचारः पथि ताम्बूलचर्वणमिति" स्मृतिः । "अनाचारोद्विविधः विहितस्यानुष्ठानाभावः निषिद्धस्याचरणञ्च । तत्र आचारशब्दे वक्ष्यमाणा भावाभावरूपाः शास्त्रे कर्त्तव्यतया ये विहितास्तेषामननुष्ठानम् अनाचारः । निषिद्धशब्दे वक्ष्यमाणानि वर्ज्जनीयतया शास्त्रे यानि उक्तानि तेषामनुष्ठानमप्यनाचारः । तत्रायं विशेषः यत्र देशे परम्पराप्रसिद्धः योऽनाचारः स, अल्पदोषाधायकः यथोक्तं माधवीये बौधायनेन "पञ्चधा विप्रतिपत्तिर्दक्षिणत उर्णाविक्रयो, अनुपनीतेन भार्य्यया च सह भोजनम्, पर्य्युषितभोजनम्, मातुलपितृष्वसृदुहितृपरिणयनम्, तथोत्तरतः सीधुपानमुभयतोदद्भिर्व्यवहार" इत्यादिकमभिधाय "इतर इतरस्मिन् कुर्वन् दुष्यति देशप्रामाण्यादिति" । "इतरोदाक्षिणात्य इतरस्मिन् उत्तरदेशे मातुलसुतादिसम्बन्धं कुर्वन् दुष्यति न स्वदेशे, तथा इतर उदीच्य इतरस्मिन् दक्षिणे देशे सीधुपानादिकं कुर्वन् दुष्यति न स्वदेशे कुतः देशप्रामाण्यात् देशनिबन्धनत्वाद्दाचारप्रमाणस्येति" माधवः । देवलः "यस्मिन् देशे य आचारः न्यायदृष्टः सुकल्पितः । स तस्मिन्नेव कर्त्तव्यो न तु देशान्तरे स्मृतः इति । यस्मिन् देशे पुरे ग्रामे त्रिविधे नगरेऽपि वा । यो यत्र विहितो धर्मस्तं धर्मं न विचालयेदिति" । "देशानुशिष्टं कुलधर्ममग्र्यं स्वजातिधर्मं न हि संत्यजेच्चेति" स्मृत्यन्तरं वृहस्पतिरपि "परम्परासिद्धानानाचारान् देशविशेषेष्वाह स्म । "उद्वह्यते दाक्षिणात्यैर्मातुलस्य सुता द्विजैः । मत्स्यादाश्च नराः पूर्व्वे व्यभिचाररताः स्त्रियः । उत्तरे मद्यपाश्चैव स्पृश्या नृणां रजस्वला इति" एवमन्येष्वनाचारा